अगस्त्यपुष्पनस्यो वै समरीचश्च भूतहृत् ।
भुजङ्गवल्ली वै हिङ्गु निम्बपत्राणि वै यवाः ।
गौरसर्षप एभिः स्याल्लेपो भूतहरः स्मृतः ॥
गोरोचना मरीचानि पिप्पली सैन्धवं मधु ।
अञ्जनं स्मृतमेभिः स्याद् ग्रहभूतहरं शिव ! ॥
अपि च ।
"वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ॥
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥"
इति गारुडे १६२ । १६६ अध्यायः ॥
शम्भुगणभूता यथा,—
"हते वराहस्य गणे भर्गमासाद्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वसभवत्तेषां चतुर्भागवतां तदा ।
वचनात् पद्मजातस्य भूतग्रामास्ततो मताः ॥
यो लोकविहितः पूर्व्वं भूतग्रामश्चतुर्व्विधः ।
यतस्तेभ्योऽधिका यस्तैस्तद्भूतग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः शम्भुगणा यथा ।"
इति कालिकापुराणे २६ अध्यायः ॥
(वसुदेवस्य पौरवीगर्भजातद्वादशपुत्राणां ज्येष्ठत्वमः । यथा, भागवते । ९ । २४ । ४७ ।
"पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥")

भूतकेशः, पुं, ( भूतस्य केश इव । ) स्वनामख्यातक्षुपम् । तत्पर्य्यायः । गोलोमी २ । इत्यमरः । २ । १० । १११ ॥ भूतकेशी ३ अश्वकेशी ४ केशी ५ । इति रत्नमाला ॥ भूतानां केश इव भूतकेशः क्लीवश्चेति केचित् । स्त्री चेत्यन्ये । अथ द्वयोर्भूतकेशो गोलोमी भूतकेशिकेति वाचस्पतिः । इति भरतः ॥

भूतकेशी, स्त्री, ( भूतकेश + गौरादित्वात् ङीष् । ) भूतकेशः । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ६० अध्याये ।
"गोलोमी चाजलोमी च भूतकेशी जटा
तथा ॥")
शेफालिका । नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

भूतक्रान्तिः, स्त्री, (भूतानां क्रान्तिः ।) भूतावेशः । इति राजनिर्घण्टः ॥

भूतगन्धा, स्त्री, (भूतः मर्द्दनं विनापि प्रकटितो गन्धोऽस्याः ।) मुरानामगन्धद्रव्यम् । इति जटाधरः ॥

भूतघ्नः, पुं, ( भूतं हन्तीति । हन् + टक् । ) उष्ट्रः । इति हेमचन्द्रः ॥ लशुनः । भूर्जवृक्षः । इति राजनिर्घण्टः ॥ भूतनाशके त्रि ॥ (यथा, तन्त्रसारे ।
"भूतघ्नैस्तु विकीर्णैस्तैर्विद्रुताः क्रूरचेतसः ।
भूतप्रेतपिशाचाश्च वेताला भैरवादयः ॥")

भूतघ्नी, स्त्री, ( भूतं हन्तीति । हन् + टक् + ङीप् । ) तुलसी । इति राजनिर्घण्टः ॥ मुण्डितिका । इति रत्नमाला ॥

भूतचतुर्द्दशी, स्त्री, ( भूतप्रिया भूतोद्देशे क्रियां कर्त्तव्या वा चतुर्द्दशी । मध्यपदलोपी समासः ।) गौणकार्त्तिककृष्णचतुर्द्दशी । सा एव यमचतुर्द्दशी । तत्कृत्यं यथा, पाद्मे ।
"चतुर्द्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः ॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशयः ॥"
स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्द्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
किञ्च पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ।
जीवत्पिता न कुर्वीत तर्पणं यमभीष्मयोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ॥
देवत्वञ्च पितृत्वञ्च यमस्यास्ति द्विरूपता ॥
नक्तं यमचतुर्द्दश्यां यः कुर्य्याच्छिवसन्निधौ ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा शैवतपोधनान् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्द्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः ॥
किञ्च ।
अमावास्याचतुर्द्दश्याः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः ॥"
इति श्रीहरिभक्तिविलासः ॥
अपि च । लैङ्गे ।
"कार्त्तिके कृष्णपक्षे च चतुर्द्दश्यां दिनोदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
अपामार्गपल्लवञ्च भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ॥
नरकाय प्रदातव्यो दीपः संपूज्य देवताः ।
नरकाय नरकनिवृत्तये ।
अर्थोऽभिधेयो वै वस्तु प्रयोजननिवृत्तिषु ॥
इति निवृत्तावपि तादर्थ्ये इत्यनेन चतुर्थीविधानात् । अपामार्गभ्रामणमन्त्रः ।
शीतलोष्णसमायुक्तसकण्टकदलान्वित ।
हर पापमपामार्ग ! भ्राम्यमाणः पुनः पुनः ॥
ततः प्रदोषसमये दीपान् दद्यात् प्रयत्नतः ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥
भविष्ये ।
कार्त्तिके भौमवारे च चित्रा कृष्णचतुर्द्दशी ।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवम् ॥
यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम्,
यमुनायां विशेषेण नियतस्तर्पयेद्यमान् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औडुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्तु दद्याज्जलाञ्जलीन् ।
सम्वत्सरकृतं पापं तत्क्षणादेव नश्यति ॥"
आचारात्तच्चतुर्द्दशशाकभक्षणं कर्त्तव्यम् । तच्च निर्णयामृतम् ।
"ओलं केमुकवास्तुकं सरषपं कालञ्च निम्बं जयां
शालिञ्चीं हिलमोचिकाञ्च पटुकं शौलफं
गुडूच्यस्तथा ।
भण्टाकीं सुनिषण्णकं शिवदिने खादन्ति ये
मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते
तिथौ ॥"
जयां जयन्तीं पटुकं पटोलं शौलफं मुलफा इति ख्यातम् । सुनिषण्णकं सुषणिया इति ख्यातम् । इति तिथ्यादितत्त्वम् ॥

भूतजटा, स्त्री, ( भूतस्य जटेव तत्सदृशत्वात् । ) जटामांसी । इति शब्दमाला ॥ (पर्य्यायो यथा,
"जटामांसी भूतजटा जटिला च तपस्विनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गन्धमांसी । इति राजनिर्घण्टः ॥

भूतद्रावी, [न्] पुं, (भूतान् पिशाचान् द्रावयतीति । द्रु + णिच् + णिनिः । ) भूताङ्कुशवृक्षः । रक्तकरवीरः । इति राजनिर्घण्टः ॥

भूतद्रुमः, पुं, ( भूतप्रियो द्रुमः । ) श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥

भूतधात्री, स्त्री, ( भूतानि धरतीति । धृ + तृच् । + ङीप् । ) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, वृहत्संहितायाम् । ८ । ३० ।
"निष्पन्नशालीक्षुयवादिशस्यां
भयैर्विमुक्तामुपशान्तवैराम् ।
संहृष्टलोकां कलिदोषमुक्तां
क्षत्रं तदा शास्ति च भूतधात्रीम् ॥")

भूतनाथः, पुं, ( भूतानां नाथः । ) शिवः । इति शब्दरत्नावली ॥ ( यथा, रघुः । २ । ५८ ।
"तद्भूतनाथानुग ! नार्हसि त्वं ॥")

भूतनायिका, स्त्री,(भूतानां नायिका नियामिका ।) दुर्गा । इति हेमचन्द्रः ॥

भूतनाशनं, क्ली, (भूतानि प्राणिजातानि नाश्यन्ते अनेनेति । नश + णिच् + ल्युट् । ) रुद्राक्षम् । इति राजनिर्घण्टः ॥

भूतनाशनः, पुं, ( भूतान् नाशयतीति ॥ नश + णिच् + ल्युः । ) भल्लातकः । इति रत्नमाला ॥ सर्षपः । इति राजनिर्घण्टः ॥

भूतपत्री, स्त्री, (भूत इव कृष्णं पत्रं यस्याः । ङीष् ।) तुलसी । इति राजनिर्घण्टः ॥

भूतपुष्पः, पुं, ( भूतयुक्तं प्राणिविशिष्टं पुष्पं यस्य ।) श्योनाकवृक्षः । इति रत्नमाला ॥

भूतपूर्णिमा, स्त्री, ( भूतानां पूर्णिमा । ) आश्विनी पूर्णिमा । तत्पर्य्यायः ॥ शारदी २ कौमुदी ३ आश्वयुजी ४ शतपर्व्वा ५ रङ्गभूतिः ६ कोजागरा ७ । इति शब्दरत्नावली ॥

भूतब्रह्मा, [न्] पुं, (भूतात्मनो ब्रह्मा ब्राह्मणः ।) देवलः । इति शब्दमाला ॥

भूतभावनः, पुं, ( भूतानि चित्यादीनि भावयति जनयतीति । भू + णिच + ल्युः । ) विष्णुः ॥